# Gandharvakanyakabhih Kritam Hatakeshvara Stotram

# गन्धर्वकन्यकाभिः कृतं हाटकेश्वरस्तोत्रम्

## Document Information

Text title : Gandharvakanyakabhih Kritam Hatakeshvara Stotram

File name : gandharvakanyakAbhiHkRRitaMhATakeshvarastotram.itx

Category : shiva, vAmanapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : vAmanapurANa | adhyAya 65/121||

Latest update : September 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 28, 2024

*sanskritdocuments.org*

# गन्धर्वकन्यकाभिः कृतं हाटकेश्वरस्तोत्रम्

नमोऽस्तु शर्व शम्भो त्रिनेत्र चारुगात्र त्रैलोक्यनाथ उमापते
दक्षयज्ञविध्वंसकर कामाङ्गनाशन घोरपापप्रणाशन
महापुरुष महोग्रमूर्ते सर्वसत्त्वक्षयङ्कर शुभङ्कर महेश्वर
त्रिशूलधारिन् स्मरारे गुहावासिन् दिग्वासः महाशङ्खशेखर ।
(५)जटाधर कपालमालाविभूषितशरीर वामचक्षुः ।
वामदेव प्रजाध्यक्ष भगाक्ष्णोः क्षयङ्कर भीमसे नमहासेननाथ
पशुपते कामाङ्गदहन चत्वरवासिन्शिव महादेव ईशान
शङ्कर भीम भववृषभध्वज जटिल प्रौढ महानाट्येश्वर भूरिरत्न ।
(१०)अविमुक्तक रुद्रेश्वर स्थाणो एकलिङ्गकालिन्दीप्रिय श्रीकण्ठ
नीलकण्ठ अपराजितरिपुभयङ्कर सन्तोषपते वामदेव अघोरतत्पुरुष
महाघोर अघोरमूर्त्ते शान्तसरस्वतीकान्त कोनाट सहस्रमूर्त्ते महोद्भव ।
(१५)विभो कालाग्निरुद्र हर महीधरप्रियसर्वतीर्थाधिवास हंस
कामेश्वर केदाराधिपतेपरिपूर्ण मुचुकुन्द मधुनिवासिन्
कृपाणपाणेभयङ्कर विद्याराज सोमराज कामराज
रञ्जकाञ्जनराजकन्याहृदचलवसते समुद्रशायिन् ।
(२०)गजमुख घण्टेश्वर गोकर्ण ब्रह्मयोनेसहस्रवक्त्राक्षिचरण
हाटकेश्वर नमोऽस्तु ते ।
एतस्मिन्नन्तरे प्राप्ताः सर्व एवर्षिपार्थिवाः ।
द्रष्टुं त्रैलोक्यकर्तारं त्र्यम्बकं हाटकेश्वरम् ॥ १२१॥

इति वामनपुराणे षट्पञ्चाशत्तमाध्यायान्तर्गतं
गन्धर्वकन्यकाभिः कृतं हाटकेश्वर(शिव)स्तोत्रं समाप्तम् ।

वामनपुराण । अध्याय ६५/१२१॥

vAmanapurANa . adhyAya 65/121..

Proofread by PSA Easwaran

*Gandharvakanyakabhih Kritam Hatakeshvara Stotram*

pdf was typeset on September 28, 2024

Please send corrections to *sanskrit@cheerful.com*